कृमिं जयेदिति" चक्रदत्तोक्ते १ कृमिघ्नतैलभेदे ।

**अपाय** पु० अप+इण्-अच् । १ विश्लेषजनकक्रियायाम् "ध्रुवमपायेऽपादानमिति" पा० । "अपाये विश्लेषजनकक्रियायामिति" सि०कौ० । "अपाये यदुदासीनमिति" हरि० । २ नाशे ३ अपगमने च ।

**अपायिन्** त्रि० अप+इण-णिनि । १ अपाययुक्ते २ वियोगिनि ३ नश्वरे च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारतेति" गीता । "अनपायिनि संश्रयद्रुमे गजभग्ना पतनाय वल्लरीति" कु० ।

**अपार** त्रि० नास्ति पारं यस्य । १ पारशून्ये २ दुःखेनोत्तार्य्ये ३ दीर्घमर्य्यादे । "महीमपारां सदने सदस्यति" ऋ० ३,३०,९ ४ अगाधे "अन्तरपार जर्वे अन्ततं दहनोः ऋ० ३,१,१४ । "अपारे अगाध" इति भा० । ५ दूरपारे "रजसी अपारे ऋ० १,४२,४६ । "इमे चिदिन्द्र ! रोदसी अपारे इति ऋ० ३,२०५ । "अपारे दूरपारे" इति भा० । ६ सीमारहिते "मही अपारे रजसी" ऋ० ९,६८,३ । "अपारे सीमारहिते" इति भा० । ७ अधिके "अपारो वो महिमा वृद्धशवस" इति ऋ० ५,८७,६ । "अपारः अधिक" इति भा० । "अपारे पारमिच्छन्तः संसारार्णवरोधसीति" महाभा० । "तदपारमसंख्येयं वानराणां महद्बलम्" रामा० । ८ अनुत्तार्य्ये "रावणस्य महाशत्रुरपारः प्रतिभाति मे इति" रामा० । तस्याः पारमपारञ्च व्रजन्ति विजयैषिण इति" भा०क०प०१९अ० । ९ नद्यादेरर्वाक्पारे न० । १० पृथिव्यां स्त्री निरु० ।

**अपार्ण** न० अप+अर्द्द-क्त नि०न । १ अभ्यर्णे समीपे निरु० । २ समीपवर्त्तिनि त्रि० ।

**अपार्थ** त्रि० अपगतोऽर्थो यस्य । १ निरर्थके २ व्यर्थे ३ निष्प्रयोजने "सर्व्वमेतदपार्थं ते क्षिप्रं तौ संप्रसादयेति" वनप० २१४ अ० । ४ अभिधेयशून्ये, "अपार्थं बहु सङ्कीर्णं भाषते" इति सुश्रुतम् । वा कप् । अपार्थकोऽप्यत्र । "अतो यदन्यद्विब्रूयुर्धर्म्मार्थं तदपार्थकमिति" मनुः । तच्च योग्यतासत्त्वाकाङ्क्षाशून्यं वाक्यं यथोक्तं गौतमेन "पौर्वापर्य्यायोगादप्रतिसम्बद्धार्थमपार्थकमिति" "पौर्वापर्य्यं कार्य्यकारणभावस्तस्याऽयोगादसम्भवात् शाब्दबोधजनकाकाङ्क्षाज्ञानाद्यसम्भवात् अप्रतिबन्धः असम्बद्धोऽर्थः प्रयोजनं शाब्दबोधरूपं यत्र । तथाचाभिमतवाक्यार्थबोधानुकूलाकाङ्क्षादिशून्यबोधजनकत्वं तत्त्वमिति तदर्थः ।

**अपाल** त्रि० नास्ति पालः पालको यस्य । १ पालकशून्ये पश्वादौ । २ ब्रह्मवादिन्यामत्रिसुतायां स्त्री । "अपालामिन्द्र ! त्रिष्पूः पूताक्रणोरिति" ऋ० ८,९,१७ । अपालामेतन्नामिकामत्रिसुतां ब्रह्मवादिनीमिति" भा० ।

**अपालम्ब** पु० अपकृष्यालम्ब्यते अप+आ-लम्ब घञ् । १ शकटपश्चाद्भागे "ततः पश्चात् परिक्रम्य अपालम्बमभिपद्याहेति" शत० ब्रा० ३,३,४,१२, "अपालम्बं शकटस्य पश्चाद्भागमिति" भा० ।

**अपावर्त्तन** न० अप+आ+वृत-ल्युट् । १ उल्लुण्ठने भूम्यादौ पतित्वा लुण्ठने, २ अपाकरणे च ।

**अपावृत** त्रि० अप+आ+वृ-क्त । १ अनावृते २ उद्घाटिते ३ अपसारितावरणे च "यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ ! लभन्ते युद्धमीदृशमिति" गीता । "अहो अपावृतं द्वारमापदामयमेष मे" रामा० ४ आवृते, ५ पिहिते स्वतन्त्रे च इति मेदिनिः ।

**अपावृति** स्त्री अप+आ+वृ-क्तिन् । १ आवरणनिवारणे उद्घाटने २ आवरणापसारणे च । "स ज स्वे रेजयत्यपावृतिमिति" ऋ० ।

**अपावृत्त** त्रि० अप+आ+वृत-क्त । १ अन्तरिते २ परावृत्ते, ३ निवृत्ते च "प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचिदिति" महा०भा० "कथं द्रक्ष्याम्यपावृत्तां परैरिव हृतां चमूमिति" रामा० ।

**अपावृत्ति** स्त्री अप+आ+वृत-क्तिन् । १ उद्वर्त्तने २ निवृत्तौ च ।

**अपाश्रय** पु० अप+आ+श्रि-अच् । १ मध्ये "पर्य्यङ्कस्यापाश्रये" इति काद० । २ अङ्गणावरणे चन्द्रातपादौ हेम० अपगत आश्रयो यस्य । २ आश्रयविहीने त्रि० ।

**अपाष्ठ** त्रि० अप+आ+स्था-क अम्बा० षत्वम् । १ अपास्थिते "शल्याद्विषं निरवचं प्राञ्जनादुत पर्णधेः । अपाष्ठाच्छृङ्गादिति" अथ० ४,६,५ ।

**अपासङ्ग** पु० अप+आ+सन्ज-घञ् कुत्वम् । १ तूणे इषुधौ ।

**अपासन** न० अप+अस-ल्युट् । १ मारणे बधे २ अपक्षेपणे, ३ दूरीकरणे च ।

**अपासित** त्रि० । अप+अस+णिच्-क्त । १ अपसारिते ।

**अपासृत** त्रि० अप+आ+सृ-क्त । १ दूरीभूते २ पलायिते ।

**अपास्त** त्रि० अप+अस+क्त । १ क्षिप्ते २ निरस्ते ३ दूरीकृते ४ अपसारिते च "समुच्छ्वलितविभ्रमा गतिरपास्तसंस्था मतिरिति" माल० "निरस्तगाम्भीर्य्यमपास्तपुष्पकमिति" माघः ।

**अपास्य** अव्य० अप+अस-ल्यप् । १ निरस्येत्यर्थे । "किमित्यपास्याभरणानि यौवने" इति कुमा० ।

**अपि** अव्य० न पियति गच्छति । पि-गतौ क्विप् न तुक् ।